# केरलकालिदासः

**Que.1. मातृभाषायां विवर्तयत।** **[Marks :(5)]**

**श्री पुन्नश्शेरी नीलकण्ठशर्मा 1858 तमे वर्षे पालक्काट् जिल्लायां जातः। तस्य पिता नारायणन् नम्पी माता नङ्य्या अन्तर्जनं च आसीत्। बाल्य एव तेन संस्कृतपठनम् आरब्धः।व्याकरण-अलङ्कार-ज्योतिष-वैद्य शास्त्रेषु पण्डितः आसीत्।पट्टाम्बी संस्कृतकलाशालायाः स्थापकः आसीत् अयं महात्मा ।**

**Ans.** मातृभाषायां विवर्तयत।

यथायोग्यं विवर्तनं करोति चेत् पूर्णाङ्कः।

**Que.2. मातृभाषायां विवर्तयत ।** **[Marks :(5)]**

**श्री पुन्नश्शेरी नीलकण्ठशर्मा 1858 तमे वर्षे पालक्काट् जिल्लायां जातः। तस्य पिता नारायणन् नम्पी माता नङ्य्या अन्तर्जनं च आसीत्। बाल्य एव तेन संस्कृतपठनम् आरब्धः।व्याकरण-अलङ्कार-ज्योतिष-वैद्य शास्त्रेषु पण्डितः आसीत्।पट्टाम्बी संस्कृतकलाशालायाः स्थापकः आसीत् अयं महात्मा ।**

**Ans.** मातृभाषायां विवर्तयत ।

यथायोग्यं विवर्तनं करोति चेत् पूर्णाङ्कः।

**Que.3. सूचनानुसारं श्रीनारायणगुरुदेवस्य जीवनचरित्रं लिखत।** **[Marks :(4)]**

**सूचनाः-**

**नाम - श्रीनारायणगुरुदेवः।**

**जननम् - 1854, चेम्पषन्ति ग्रामे।**

**पितरौ - माडनाशान् कुट्टियम्मा च।**

**सन्देशः - एका जातिः, एको धर्मः, एको देवः मनुष्यस्य।**

**समाधिः - 1928. शिवगिरौ।**

**Ans.** सूचनानुसारं जीवचरित्रं लिखति चेत् पूर्णाङ्कः।

सूचनानां स्वीकारः।

क्रमशः लेखनम्।

भाषाशुद्धिः।

**Que.4. खण्डिकां पठित्वा प्रश्नानाम् उत्तराणि लिखत ।** **[Marks :(5)]**

**कालिदासेन विरचितं अभिज्ञानशाकुन्तलं नाम नाटकस्य कैरल्यां प्रथम विवर्तकः भवति केरलवर्मा वलियकोयित्तम्पुरान्। तस्मात् सः केरलकालिदासः इति प्रसिद्धिं प्राप्तवान् । विशाखविजयम् नाम महाकाव्यम्, मणिप्रवालरीतिम् अवलम्ब्य मयूरसन्देशं नाम सन्देशकाव्यं च तेन विरचीतम्। सः मृगया विनोदे,**

**अश्वधावने चतुरङ्गे च समर्थः आसीत्। इदंप्रथमतया अनन्तपुरे क्रिक्कट् क्लब् स्थापितवान्।सः चतुर्दशोत्तर नवशताधिक सहस्रतमे वर्षे दिवङ्गतोऽभूत्।**

**१. अभिज्ञानशाकुन्तलस्य कर्ता कः?**

**२. केरलकालिदासस्य पूर्णं नाम किम् ?**

**३. केरलकालिदासेन विरचितं महाकाव्यम् किम् ?**

**४. सः केषु समर्थः आसीत् ?**

**५. 'दिवङ्गतोऽभूत्' - विश्लेषयत ।**

**Ans.** खण्डिकां पठित्वा प्रश्नानाम् उत्तराणि लिखत।

१)कालिदास:।

२)केरलवर्मा वलियकोयितम्बुरान्।

३)विशाखविजयम्।

४)मृगयाविनोदे, अश्वधावने, चतुरंगे च समर्थ: आसीत्।

५)दिवंगत: + अभूत्।

**Que.5. अधोरेखाङ्कितं पदं उत्तरत्वेन लब्धुमर्हान् प्रश्नान् लिखत।** **[Marks :(1)]**

**( किम्, कदा, कुत्र, किमर्थम्, कः )**

**क. केरलकालिदासः१८४० तमे वर्षे जनिम् अलभत ।**

**ख. केरलवर्मा वलियकोयित्तम्पुरान् केरलकालिदासः इति प्रसिद्धःभवति ।**

**ग केरलकलामण्ङलं चेरुतुरुत्ती ग्रामे वर्तते ।**

**घ. भारतसर्वकारस्य ध्येयवाक्यं भवति सत्यमेव जयते ।**

**ङ. युवकः आरोग्यसंरक्षणार्थं व्यायामं करोति ।**

**Ans.** अधोरेखाङ्कितपदम् उत्तरत्वेन लब्धुमर्हान् प्रश्नान् लिखतु।

क) कदा?

ख) क:?

ग) कुत्र?

घ) किम्?

ङ) किमर्थम्?

**Que.6. उदाहरणानुसारम् एकं पदं लिखत ।** **[Marks :(1)]**

**उदा - कविषु सार्वभौमः कविसार्वभौमः।**

**क. मुनिषु सार्वभौमः ------------- ।**

**ख. गुरुषु सार्वभौमः ------------- ।**

**Ans.** उदाहरणानुसारम् एकं पदं लिखत।

क) मुनिसार्वभौम:।

ख) गुरुसार्वभौम:।

**Que.7. उदाहरणानुसारं विश्लेशयत ।** **[Marks :(1)]**

**उदा - निष्णातोऽभवत् - निष्णातः + अभवत्।**

**पण्डितोऽभवत् - ---------+ -------।**

**गायकोऽभवत् - ---------+ -------।**

**लेखकोऽभवत् - ---------+ -------।**

**सुन्दरोऽभवत् - ---------+ ------।**

**Ans.** उदाहरणानुसारम् विश्लेषयत।

पण्डित: + अभवत्

गायक: + अभवत्

लेखक: + अभवत्

सुन्दर: + अभवत्

**Que.8. उदाहरणानुसारं वाक्यपरिवर्तनं करोतु-** **[Marks :(2)]**

**उदा- सुगतकुमारी कवयित्री भवति । परिस्थितिप्रवर्तका च भवति।**

**सुगतकुमारी न केवलं कवयित्री किन्तु परिस्थितिप्रवर्तका च भवति ।**

**क. सुकुमार् अषीक्कोड् वाग्मी आसीत्। सः ग्रन्थकारः च आसीत् ।**

**ख. ए पि जे अब्दुल्कलाम् राष्ट्रपतिः आसीत् । सः शास्त्रज्ञः च आसीत् ।**

**ग. सच्चिन् तेण्डुल्कर् क्रिक्कट् क्रीडकः भवति । सः राज्यसभा सदस्यः च भवति ।**

**घ. विनीत् श्रीनिवासः गायकः भवति। सः अभिनेता च भवति ।**

**Ans.** उदाहरणानुसारम् वाक्यपरिवर्त्तनं करोतु

क) सुकुमार अषीकोड् न केवलं वाग्मी किन्तु ग्रन्थकार: चासीत्।

ख) ए पी जे अब्दुल् कलाम् न केवलं राष्ट्रपति: किन्तु शास्त्रज्ञ: च आसीत्।

ग) सच्चिन् तेण्डुल्क्कर् न केवलं क्रिक्केट् क्रीडक: किन्तु राज्यसभा सदस्य: च भवति।

घ) विनीत् श्रीनिवास: न केवलं गायक: किन्तु अभिनेता च भवति ।

**Que.9. संस्कृतकृतयः अनूदितकृतयः च विविच्य पट्टिकां लिखत** **[Marks :(3)]**

**(विशाखविजयम्,उज्जयिनी, यमप्रणामशतकम्, माकन्दमञ्जरी, सीताविचारलहरी, क्षमापणसहस्रम्, श्रीपद्मनाभपदपद्मशतकम्,गलितकुसुमम् )**

| **संस्कृतकृतयः** | **अनूदितकृतयः** |
|---|---|

**Ans.** संस्कृतकृतयः अनूदितकृतयः च विविच्य पट्टिकां लिखत

संस्कृतकृतयः- विशाखविजयम्, यमप्रणामशतकम्, श्रीपद्मनाभपदपद्मशतकम्।

अनूदितकृतयः- उज्जयिनी, माकन्दमञ्जरी, सीताविचारलहरी, गलितकुसुमम् ।

**Que.10. वाक्यं पठित्वा वर्षं कोष्ठकात् निर्धार्य सङ्ख्यारुपेण लिखत।** **[Marks :(2)]**

**१ (1945, 1856, 1772, 1840)**

**क) क. राजाराम् मोहनरोय् द्विसप्तत्युत्तर सप्तशताधिक सहस्रतमे वर्षे वङ्गदेशे जनिमलभत ।**

**ख. श्रीनारायणगुरुदेवः षड्पञ्चाशदुत्तर अष्टशताधिक सहस्रतमे वर्षे चेम्पषन्ति ग्रामे जनिमलभत ।**

**ग. रामनाथ् कोविन्द् महाशयः पञ्चचत्वारिंशदुत्तर नवशताधिक सहस्रतमे वर्षे जनिमलभत।**

**घ. केरलकालिदासः चत्वारिंशदुत्तराष्टशताधिक सहस्रतमे वर्षे चङ्ङनाश्शेरि प्रदेशे जनिमलभत ।**

**ख) अधोदत्तानि वर्षाणि उदाहरणानुसारं अक्षरैः लिखत -**

**२ (पञ्चाशत्यधिकनवशतोत्तरसहस्रम् , चतुस्सप्तत्युत्तरनवशतोत्तरसहस्रम् , षड्पञ्चाशदधिकनवशतोत्तरसहस्रम् ,नवनवत्युत्तरनवशतोत्तरसहस्रम् , सप्तचत्वारिशत्यधिकनवशतोत्तरसहस्रम्)**

**उदा - 1948 – अष्टचत्वारिंशदधिक नवशताधिक सहस्रम् ।**

**1956 - --------------------------------------- ।**

**1950 - --------------------------------------- ।**

**1947 - --------------------------------------- ।**

**1974 - --------------------------------------- ।**

**1999 - --------------------------------------- ।**

**Ans.** वाक्यं पठित्वा वर्षं सम्ख्यारूपेण लिखत।

क)

क) 1772

ख) 1856

ग) 1945

घ) 1840

ख) वर्षं अक्षरै: लिखत

षड्पञ्चाशदधिकनवशतोत्तरसहस्रम्।

पञ्चाशत्यधिकनवशतोत्तरसहस्रम्।

सप्तचत्वारिंशत्यधिकनवशतोत्तरसहस्रम्।

चतुस्सप्तत्युत्तरनवशतोत्तरसहस्रम्।

नवनवत्युत्तरनवशतोत्तरसहस्रम्।

**Que.11. समुचितमुत्तरं कोष्ठकात् निर्धार्य लिखत ।** **[Marks :(1)]**

**१. केरलकालिदासेन विरचितं महाकाव्यम् किम्?**

**(विशाखविजयम्, क्षमापणसहस्रम्, मयूरसन्देशम्, नक्षत्रमाला )**

**२. मयूरसन्देशस्य कर्ता कः?**

**(केरलकालिदासः, केरलव्यासः, केरलपाणिनिः, केरलसिंहः)**

**3. 'निष्णातः' इत्यस्य समानार्थकं पदं चित्वा लिखत-**

**(पण्डितः, कुशलः कविः, रक्षकः)**

**४. केरलकालिदासः क्रिक्कट् क्लब् कित्र स्थापितवान्?**

**(तृश्शिवपुरे, अनन्तपुरे, कोल्लं नगरे, कोडुङ्ङल्लूर् देशे)**

**५ किं गणे नान्तर्भवति?**

**(मयूरसन्देशम्, चातकसन्देशम्, मेघसन्देशम्, कोकसन्देशम् )**

**Ans.** समुचितमुत्तरम् निर्धार्य लिखत।

१) विशाखविजयम्।

२) केरलकालिदास:।

३) कुशल:।

४) अनन्तपुरे।

५) मेघसन्देशम्।

**Que.12. यथोचितं योजयत।** **[Marks :(1)]**

**क) केरलकालिदासः - कोटुङ्ङल्लूर् कुञ्ञिकुट्टन् तम्पुरान्।**

**केरलव्यासः - ए आर् ऱाजराजवर्मा।**

**केरलपाणिनिः - केरलवर्मा पषश्शिराजा ।**

**केरलसिंहः - केरलवर्मा वलियकोयित्तम्पुरान् ।**

**ख) कविसार्वभौमः - नाटकम् ।**

**विशाखविजयम् - सन्देशकाव्यम् ।**

**अभिज्ञानशाकुन्तलम् - महाकाव्यम् ।**

**यूरसन्देशम् - ए.आर्.राजराजवर्मा ।**

**Ans.** यथोचितं योजयत।

क) केरलवर्म्मा वलियकोयितम्बुरान्

कोडुङ्ङल्लूर् कुञ्ञिक्कुट्टन् तम्बुरान्

ए आर् राजराजवर्म्मा

केरलवर्मा पषशिराजा

ख) ए आर् राजराजवर्मा

महाकाव्यम्

नाटकम्

सन्देशकाव्यम्

**Que.13. प्रदत्तां खण्डिकां पठित्वा प्रश्नानामुत्तराणि लिखत ।** **[Marks :(5)]**

**कस्मिंश्चित् वने चित्राङ्गः नाम मृगः वसति स्म। तस्य सखा सुबुद्धिः नाम कश्चन काकः। एकदा तत्र आगतः कश्चन जम्बूकः मृगेण सह मित्रत्वमापन्नः।सः मृगस्य मांसम् अनायासं भक्षयितुम् उपायः चिन्तयन् अवर्तत। काकः जम्बूकस्य प्रवर्तनेषु संशयालुः आसीत्। एकदा जम्बूकेन सस्यपूर्णं क्षेत्रमानीतः चित्राङ्गः जाले बद्धः अभूत्। जम्बूकस्तु समीप एव निलीय अतिष्ठत्।**

**क. चित्राङ्गः कुत्र वसति स्म ?**

**ख. चित्राङ्गस्य मित्रस्य नाम किम् ?**

**ग. जम्बूकः किं चिन्तयन् अवर्तत ?**

**घ. खण्डिकातः तुमुन्नन्तम् अव्ययपदं चित्वा लिखत।**

**ङ. 'जम्बूकस्तु' इति पदं विश्लेषयत ।**

**Ans.** क. वने।

ख. सुबुद्धि नाम काकः।

ग. जम्बूकः मृगस्य मांसम् अनायासं भक्षयित्वा उपायः चिन्तयति।

घ. जम्बूकः+ तु।

**Que.14. मातृभाषायां विवर्तयत।** **[Marks :(5)]**

**मलयालसाहित्यनिरूपणमण्डले प्रशस्ता भवति डा. एम् लीलावती। सा 1927 तमे वर्षे सेप्तम्बर् मासे कोट्टप्पटी ग्रामे जाता। सा विविध महाविद्यालयेषु अध्यापिका आसीत्।भाषासाहित्यनिरूपिका सा विविधान् ग्रन्थान् अरचयत्। भारतसर्वकारेण पद्मश्री पुरस्कारेण सा समादृता च।**

**Ans.** मातृभाषायां विवर्तयत।

यथायोग्यं विवर्तनं करोति चेत् पूर्णाङ्कः।

**Que.15. प्रादेशिकभाषया विवर्तयत।** **[Marks :(5)]**

**कैरल्याम् आधुनिककवित्रयेषु अन्यतमः भवति कुमारनाशान् महोदयः। संस्कृतपण्डितः श्रीनारायणगुरुदेवस्य शिष्यश्च आसीत् । सः कैरल्याम् अनेकानि काव्यानि रचितवान्। तेषु वीणपुव्, नलिनी, लीला, दुरवस्था इत्यादीनि प्रमुखानि भवन्ति।सः एकस्यां नौकादुर्घटनायां दिवङ्गतः ।**

**Ans.** प्रादेशिकभाषया विवर्तयत।

यथायोग्यं विवर्तनं करोति चेत् पूर्णाङ्कः।

**Que.16. XII.प्रदत्तां खण्डिकां पठित्वा प्रश्नानामुत्तराणि लिखत।** **[Marks :(4)]**

**प्रसिद्धसंस्कृतपण्डितः डा. आर् वासुदेवन् पोट्टि महाशयः 1929 तमे वर्षे कर्णाटकराज्ये कोक्कट् ग्रामे जनिमलभत। रामन् पोट्टि कावेरि अम्माल् च तस्य पितरौ। बालहितैषिणी, लघुसिद्धान्तकौमुदी (अनूदितः), गुरूपदेशस्तवम्, आत्मानात्मविवेकं च तस्य प्रधानकृतयः। कालटि श्रीशङ्कराचार्यसर्वकलाशालायां वेदान्तविभागस्य अध्यक्ष आसीत् सः। महोदयोऽयं केन्द्रसाहित्यअक्कादमी सदस्यः, राज्यस्थरीय पाठपुस्तक समित्यां अङ्गम् इत्यादि मेखलासु प्रशस्तः भवति।**

**क. वासुदेवन् पोट्टि महाशयस्य पितरौ कौ ?**

**ख. सः कुत्र जनिमलभत ?**

**ग बालहितैषिणी कस्य कृतिः ?**

**घ. जनिमलभत इति पदस्य पदच्छेदः कः ?**

**ङ. स कस्य समित्याम् अङ्गमासीत् ?**

**Ans.** क. रामन् पोट्टि, कावेरि अम्माल्।

ख. कर्णाडकराज्ये कोक्कट् ग्रामे।

ग. डो.आर् वासुदेवन् पोट्टि महाशयस्य।

घ. जनिम् +अलभत।

ङ. राज्यस्तरीय पाठपुस्तकसमित्याम् अङ्गम्।

**Que.17. मातृभाषायां विवर्तयत।** **[Marks :(5)]**

**सचिन् रमेष् तेण्डुल्कर् 1973 तमे वर्षे मुम्बै नगरे जातः। बाल्य एव क्रिक्कट् क्रीडायां मग्नः आसीत् । स्व षोडशे वयसि सः भारतीय क्रिक्कट् दले भागभाक् अभवत्। पश्चात् भारतीय क्रिक्कट्दलस्य नायकः अपि अभवत्।**

**Ans.** मातृभाषायां विवर्तयत।

यथायोग्यं विवर्तनं करोति चेत् पूर्णाङ्कः।